**तृतीयः पाठः**

# धैर्यधनाः हि साधवः

*[प्रस्तुत पाठ 400 ईसवी के लगभग विराजमान आर्यशूर द्वारा संग्रहीत '**जातकमाला**' से उद्धृत है। इसमें बोधिसत्व की पूर्वजन्म की कथाओं का वर्णन है। इन कथाओं में कथा-तत्त्व और कथोपकथन दोनों का ही सम्मिश्रण है। जातककथाओं की संख्या 500 के लगभग है। इन कथाओं का चीनी भाषा में भी अनुवाद हुआ है। आर्यशूर की भाषा अत्यन्त सरल और सौष्ठवयुक्त है।*

*इस पाठ में बोधिसत्त्व के नाविक के रूप में जन्म लेने और धर्म-पालन द्वारा कठिन विपत्ति में भी धैर्य न खोकर प्राण पाने का वर्णन है। अत्यन्त प्राचीनकाल में भी भारत के अत्यधिक साहसी नाविकगण अपने अल्पसाधनों से कितनी दूर तक की यात्राएँ करते थे, इस तथ्य का ज्ञान हमें इस कथा के 'सुपारग' और उसके साथियों की नलमाली, कुशमाली, अग्निमाली आदि समुद्र-यात्राओं से होता है।]*

बोधिसत्त्वभूतः किल महासत्त्वः परमनिपुणमतिः नौसारथिः बभूव। धर्मता हि एषा बोधिसत्त्वानां प्रकृतिमेधावित्वात् यदुत यं यं शास्त्रातिशयं जिज्ञासन्ते कलाविशेषं वा, तस्मिंस्तस्मिन्नधिकतरा भवन्ति मेधाविनो जगतः। अथ स महात्मा विदितज्योतिः गतित्वाद् दिग्विभागेषु असम्मूढमतिः परिविदितनियता-गन्तुकौत्पातिकनिमित्तः, कालाकालक्रमकुशलः, मीनतोयवर्णभौमप्रकारशकुनिपर्वतादिभिः चिह्नैः सूपलक्षितसमुद्रप्रदेशः, स्मृतिमान् विजिततन्द्रीनिद्रः, शीतोष्णवर्षादिपरिखेदसहिष्णुः, अप्रमादी, धृतिमान्, ईप्सितं देशं प्रापयिता वणिजामासीत्। तस्य 'सुपारग' इत्येव नाम बभूव। तदध्युषितञ्च पत्तनं सुपारगमित्येवमाख्यातमासीत्। यदेतर्हि सुपारग इति ज्ञायते सोऽपि मङ्गलसम्मतत्वात् वृद्धत्वेऽपि सांयात्रिकैः यात्रासिद्धिकामैः वहनमभ्यर्थनसत्कारपुरः सरमारोप्यते स्म।

अथ कदाचिद् भरुकच्छादिभिः प्रयाता सुवर्णभूमिवणिजो यात्रासिद्धिकामा सुपारगं पत्तनमुपेत्य तं महासत्त्वं वहनारोहणार्थमभ्यर्थयामासुः। सः तान् उवाच–जराधिक्यत्वात् असमर्थोऽहम् साहाय्ये।

वणिजः ऊचुः–विदितेयमस्माकं युष्मच्छरीरावस्था। सत्यपि च वः पराक्रमासहत्वे नैव वयं कर्मविनियोगेन युष्मानायासयितुमिच्छामः।

अथ स महात्मा तेषामनुकम्पया जराशिथिलशरीरोऽपि तद्वहनमारुरोह। तदधिरोहणाच्च प्रमुदितमनसः सर्व एव ते वणिजो बभूवुः, नियतमस्माकं यात्रासिद्धिरिति। क्रमेण च अवजगाहिरे विविधमीनकुलविचरितम्, बहुविधरत्नैर्युतम्, दुरापपातालमप्रमेयं तोयं महासमुद्रम्।

तेषां तत्रानुप्राप्तानां सायाह्नसमये मृदुभूतकिरणचक्रप्रभावे सवितरि महदौत्पातिकं परमभीषणं प्रादुरभूत्।

अथ ते सांयात्रिकाः पवनबलचलितसलिलवेगवशगया नावा परिभ्रम्यमाणाः बहुभिरपि अहोभिः नैव कुतश्चित् तीरं ददृशुः, न व यथेप्सितानि समुद्रचिह्नानि। अपूर्वै- रेव तु समुद्रचिह्नैः अभिवर्धमानवैमनस्यभयविषादव्याकुलतामुपजग्मुः। अथैतान् सुपारगो बोधिसत्त्वो व्यवस्थापयन्नुवाचअनाश्चर्यं खलु महासमुद्रप्राप्तानां औत्पातिकोक्षोभपरिक्लेशः। तदलमत्र भवतां विषादानुवृत्या। यथाधिकाराः विहिता भवन्तु भवन्तः। इति ते सांयात्रिकाः समुद्रमवलोकयन्तः ददृशुः पुरुषविग्रहानामुक्तरूप्यकवचान् इव निमज्जतो उन्मज्जतश्च। ते सविस्मया सुपारगमपृच्छन्– भगवन्! एते खलु के? यतो न भेतव्यमतः किं तु खुरमाली अयं समुद्रः तद्यतध्वं निवर्तितुम्।

परं चण्डवेगवाहिना वायुना समाक्षिप्तया न ते शेकु: विनिवर्तितुम्। अथ ते रूप्यप्रभावभासितं समुद्रमालोक्य सुपारगमूचु: भगवन्! कोऽयं समुद्र:? सुपारग उवाच–कष्टम्, अतिदूरं खल्ववगाह्यते। अयं क्षीरार्णवो उदधि:। अत: परं गन्तुं न क्षम: नैव निवर्तितुम्।

वणिज: ऊचु:–न खलु शक्यते विलम्बयितुं वहनम्। अथ व्यतीत्य तमपि समुद्रं सुवर्णप्रभानुरञ्जितं समुद्रमालोक्य वणिज: सुपारगं पप्रच्छु: को नाम महार्णवोऽयम्? सुपारग: उवाच–अयं समुद्र: अग्निमाली इति विख्यात:। स महात्मा नाममात्रमकथयत्तस्य सरित्पतेर्नतोयवैवर्ण्यकारणं दीर्घदर्शित्वात्। अथ ते सांयात्रिका: तमपि समुद्रमतीत्य पुष्परागेन्द्रनीलप्रभोद्योतितसलिलं समुद्रमालोक्य कौतूहलजाता सुपारगं पप्रच्छु:–भगवन्! कतमोऽयं सलिलनिधि:?

सुपारग: उवाच–भो: सार्थवाहा! निवर्तनं प्रति यत्नं क्रियताम्। न खल्वत: क्षमते गन्तुम्। अयं कुशमाली नाम समुद्र:।

अथ ते वाणिजका: परेणापि यत्नेन निवर्तयितुमशक्नुवन्त: तमपि समुद्रमतीत्यवंशरागहरितसलिलमपरं समुद्रमालोक्य सुपारगमपृच्छन्। भगवन्! मरकतहरितप्रभै: जलै: युक्तो कतमोऽयं सलिलनिधि:?

अथ स महात्मा तेन वणिग्जनस्य व्यसनोपनिपातेन दह्यमानहृदयो दीर्घमुष्णञ्च नि:श्वस्य शनैरुवाच–अस्माकं काल इवायं नलमाली नाम सागर:।

तच्छ्रुत्वा ते वाणिजका: विषादोपरुध्यमानमनस: नि:श्वसितमात्र परायणास्तत्रैव निषेदु:। व्यतीत्य च तमपि समुद्रं सायाह्नसमये श्रुतिहृदयविदारणं समुद्रध्वनिमश्रौषु:। परमभयविषादविह्वला: ते सुपारगमुपेत्योचु: भगवन्! कोऽयमुदधि:? अथ स महात्मा ससम्भ्रम: कष्टमित्युक्त्वा समुद्रमालोकयन्नुवाच–

**यत्प्राप्य न निवर्तन्ते मृत्योर्मुखमिवामुखम्।**
**अशिवं समुपेतास्थ तदेतद् वडवामुखम्।।**

तदुपश्रुत्य ते वणिजा त्यक्तजीविताशा सस्वरं रुरुदु:। अथ स महात्मा महत्या करुणया समापीड्यमानहृदय: तान् उवाच अस्यापि न: कश्चित्प्रतीकारविधि: प्रतिभाति। तत्तावत्प्रयोक्ष्ये। अथ ते तूष्णीं बभूवु:।

अथ सुपारगो बोधिसत्त्व: नावमधिष्ठाय दक्षिणेन जानुमण्डलेन प्रणम्य तथागतेभ्य: तान् उवाच–शृण्वन्तु अत्रभवन्त: सांयात्रिका: सलिलनिधिव्योमाश्रयाश्च देवविशेषा:! मम पुण्यबलेन अहिंसाबलेन चेयं नौ: स्वस्तिविनिवर्तताम्। अथ तस्य महात्मन: सत्याधिष्ठानबलात् पुण्यतेजसा सह सलिलजवेन स मारुतो व्यावर्तमानस्तां नावं निवर्तयामास। निवृत्तां नावं अभिसमीक्ष्य ते वाणिजका: परमविस्मयप्रहर्षोद्धतमनसा निवृत्ता नौरिति सुपारगाय ऊचु:।

अथ स महात्मा तान् वाणिजकानुवाच– स्थिरीभवन्तु भवन्त:।

तेन समादिष्टा ते तथा चक्रु:।

निवृत्तायां तु तस्यां नाव्यनुकूलसलिलमारुतायां स्वेच्छया एव प्रयातायां सुपारगस्तानुवाच– भो: सार्थवाहा:! नलमालिप्रभृतिभ्यो समुद्रेभ्यो बालुकापाषाणाश्च वहनमारोप्यन्तां यावत्सहते। एते बालुकापाषाणा नियतं लाभसिद्धये वो भविष्यन्ति। अथ ते सांयात्रिका: अनुप्रदर्शितेभ्य: स्थलेभ्य: आदाय बालुकापाषाणबुद्ध्या वैदूर्यादीनि रत्नानि वहनमारोपयामासु:। तेनैव च एकरात्रेण सा नौ: भरुकच्छमुपजगाम। अथ प्रभाते रजतेन्द्रनीलवैदूर्यहेमप्रतिपूर्णां नौकां दृष्ट्वा अतीवहर्षा: प्रीत्या तं सुपारगमानर्चु:। तदेवं धर्माश्रयं सत्यवचनमपि आपदं नुदतीति।

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–
   (क) कोऽयं सुपारग: कस्मात्तस्यायं नाम?
   (ख) सुपारग: वणिग्साहाय्ये कथम् असमर्थो जात:? **(2020MU)**
   (ग) वणिज: कीदृशं समुद्रं अवजगाहिरे?
   (घ) वणिज: कान् कान् समुद्रान् ददृशु?
   (ङ) सायाह्नसमये वणिज: कीदृशीं समुद्रध्वनिमश्रौषु:?
   (च) सुपारग: वणिग्जनान् किमुवाच? **(2020MO)**
   (छ) सुपारग: नावमधिष्ठाय तथागतेभ्य: प्रणम्य सांयात्रिकान् किमुवाच?
   (ज) नलमालिसमुद्रेभ्योप्राप्त बालुकापाषाणाश्च प्रभाते कीदृशा जाता:?
   (झ) धर्माश्रयं सत्यवचनमापदं कथंनुदति?
   (ञ) जातकमालाया: रचयिता क:? **(2018HP, 20MS)**
   अथवा जातकमाला कस्य रचना अस्ति?
   अथवा जातकमालाया: रचयिता क: आसीत्?
   (ट) सुपारग: क: आसीत्? **(2018HR, 19AQ)**
   (ठ) आर्यशूरस्य रचनाया: किं नाम आसीत्?
2. 'धैर्यधना: हि साधव:' पाठ का सारांश लिखिए।
3. 'धैर्यधना: हि साधव:' पाठ के आधार पर सुपारग के चरित्र की विशेषताएँ लिखिए।
   *अथवा* 'धैर्यधना: हि साधव:' पाठ के आधार पर सुपारग का चरित्र-चित्रण कीजिए। **(2018HQ, HT, 19AT, AU)**
4. 'धैर्यधना: हि साधव:' पाठ से क्या शिक्षा मिलती है?
5. सुपारग ने व्यापारियों की बड़वानल से रक्षा कैसे की?
6. 'धैर्यधना: हि साधव:' के आधार पर बोधिसत्व का चरित्र-चित्रण कीजिए। **(2020MR)**

# वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए–**

1. **जातकमाला .................. रचना अस्ति।** **(2018HQ)**
   (क) आर्यशूरस्य (ख) हर्षस्य (ग) वल्लालसेनस्य (घ) अम्बिकादत्तस्य
2. **सुपारग: ................. आसीत्।**
   (क) कृषक: (ख) नवयुवक: (ग) नौसारथि: (घ) वणिक:
3. **अयं ................. नाम समुद्र:।**
   (क) कुशमाली (ख) सुपारग: (ग) कृषक: (घ) बोधिसत्व:
4. **पूर्व जन्मनि सुपारग: आसीत्–**
   (क) इन्द्र: (ख) बोधिसत्व: (ग) नृप: (घ) अर्जुन:
5. **सुपारग: ...............ज्ञाता आसीत्।**
   (क) वेदानां शास्त्राणाम् (ख) रत्नानाम् समुद्राणां (ग) वनस्पतीनां (घ) संगीत शास्त्राणाम्
6. **सुपारग: ...............नाम बभूव।**
   (क) वणिज: (ख) पत्तनस्य (ग) ग्रामस्य (घ) नौसारथे

## ➨ आन्तरिक मूल्यांकन

इस पाठ से मिलने वाली शिक्षाओं की एक सूची तैयार कीजिए। ●